# Natya Shastra Chapter 15

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૫

## Document Information


Text title : naaTyashaastra adhyaaya 15 Chandovichitirnaama

File name : natya15.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : Sowmya Krishnapur krsowmya at yahoo.com

Proofread by : Sowmya Krishnapur krsowmya at yahoo.com

Latest update : April 20, 2005

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# Natya Shastra Chapter 15

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૫

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્
અથ પઞ્ચદશોઽધ્યાયઃ
છન્દાંસ્યેવં હિ યાનીહ મયોક્તાનિ દ્વિજોત્તમાઃ ।
વૃત્તાનિ તેષુ નાટ્યેઽસ્મિન્ પ્રયોજ્યાનિ નિબોધત ॥ ૧॥

આદ્યે પુનરન્ત્યે દ્વે દ્વે ગુરુણી ચેત્ ।
સા સ્યાત્તનુમધ્યા ગાયત્રસમુત્થા ॥ ૨॥

યથા - સંત્યક્તવિભૂષા ભ્રષ્ટાઞ્જનનેત્રા ।
હસ્તાર્પિતગણ્ડા કિં ? ત્વં તનુમધ્યા ॥ ૩॥

લઘુગણ આદૌ ભવતિ ચતુષ્કઃ ।
ગુરુયુગમન્ત્યે મકરકશીર્ષા ॥ ૪॥

યથા - સ્વયમુપયાન્તં ભજસિ ન કાન્તમ્ ।
ભયકરિ કિં ? ત્વં મકરકશીર્ષા ॥ ૫॥

એકમાત્રં ષટ્કે સ્યાદ્ દ્વિતીયં પાદે ।
ખ્યાતરૂપા વૃત્તે સા માલિની નામ્ના ॥ ૬॥

ષડક્ષરકૃતે પાદે લઘુ યત્ર દ્વિતીયકમ્ ।
શેષાણિ તુ ગુરૂણિ સ્યુર્માલિની સા મતા યથા ॥ ૭॥

સ્નાનગન્ધાધિક્યૈર્વસ્ત્રભૂષાયોગૈઃ ।
વ્યક્તમેવાસૌ ત્વં માલિની પ્રખ્યાતા ॥ ૮॥

દ્વિતીયં પઞ્ચમં ચૈવ લઘુ યત્ર પ્રતિષ્ઠિતમ્ ।
શેષાણિ ચ ગુરૂણિ સ્યુર્માલતી નામ સા યથા ॥ ૯॥

શોભતે બદ્ધ્યા ષટ્પદાવિદ્ધ્યા ।

માલતીમાલયા માનિની લીલયા ॥ ૧૦॥

દ્વિતીયં ચ ચતુર્થં ચ પઞ્ચમં ચ યદા લઘુ ।
યસ્યાઃ સપ્તાક્ષરે પાદે જ્ઞેયા સા તૂદ્ધતા યથા ॥ ૧૧॥

સૌ ત્રિકૌ યદિ પાદે હ્યન્તિમશ્ચ ગકારઃ ।
ઉષ્ણિગુત્થિતપાદા ઉદ્ધતા ખલુ નામ્ના ॥ ૧૨॥

દન્તકૃન્તકૃતાસ્ત્રં વ્યાકુલાલકશોભમ્ ।
શંસતીવ તવાસ્યં નિર્દયં રતયુદ્ધમ્ ॥ ૧૩॥

આદૌ દ્વે નિધને ચૈવ ગુરુણી યત્ર વૈ સદા ।
પાદે સપ્તાક્ષરે જ્ઞેયા નામ્ના ભ્રમરમાલિકા ॥ ૧૪॥

પાદે પાદે નિવિષ્ટૌ સમ્યગ્વિરચિતૌ ત્સૌ ।
અન્ત્યે યદિ ગકારઃ સા તુ ભ્રમરમાલા ॥ ૧૫॥

યથા - નાનાકુસુમચિત્રે પ્રાપ્તે સુરભિમાસે ।
એષા ભ્રમતિ મત્તા કાન્તે ભ્રમરમાલા ॥ ૧૬॥

આદ્યં તૃતીયમન્ત્યં ચ પઞ્ચમં સપ્તમં તથા ।
ગુરૂણ્યષ્ટાક્ષરે પાદે સિંહલેખેતિ સા યથા ॥ ૧૭॥

જાતુ યસ્ય ગૌ ન , પાદે સંસ્થિતઃ સમસ્વરૂપે ।
તામનુષ્ટુબાશ્રયસ્થાં વાવદન્તિ સિંહલેખામ્ ॥ ૧૮॥

યત્ત્વયા હ્યનેકભાવૈશ્ચેષ્ટિતં રહઃ સુગાત્રિ ।
તન્મનો મમ પ્રવિષ્ટં વૃત્તમદ્ય સિંહલેખમ્ ॥ ૧૯॥

ચતુર્થં ચ દ્વિતીયં ચ ષષ્ઠમષ્ટમમેવ ચ ।
ગુરૂણ્યષ્ટાક્ષરે પાદે યત્ર તન્મત્તચેષ્ટિતમ્ ॥ ૨૦॥

યદા તુ જાત્પરૌ રલૌ ગકાર એવ ચ સ્થિતઃ ।
અનુષ્ટુબુદ્ભવં તદા વદન્તિ મત્તચેષ્ટિતમ્ ॥ ૨૧॥

યથા - ચરાવઘૂર્ણિતેક્ષણં વિલમ્બિતાકુલાલકમ્ ।
અસંસ્થિતૈઃ પદૈઃ પ્રિયા કરોતિ મત્તચેષ્ટિતમ્ ॥ ૨૨॥

અષ્ટાક્ષરકૃતે પાદે સર્વાણ્યેવ ભવન્તિ હિ ।
ગુરૂણિ યસ્મિન્સા નામ્ના વિદ્યુન્માલેતિ કીર્તિતા ॥ ૨૩॥

મૌ ગૌ ચાન્ત્યૌ યસ્યાઃ પાદે પાદસ્યાન્તે વિચ્છેદશ્ચ ।
સા ચાનુષ્ટુપ્છન્દસ્યુક્તા નિત્યં સદ્ભિર્વિદ્યુન્માલા ॥ ૨૪॥

સામ્ભોભારૈરાનાનદ્ભિઃ શ્યામામ્ભોદૈર્વ્યાપ્તે વ્યોમ્નિ ।
આદિત્યાંશુસ્પર્ધિન્યેષા દિક્ષુ ભ્રાન્તા વિદ્યુન્માલા ॥ ૨૫॥

પઞ્ચમં સપ્તમં ચાન્ત્યં ગુરુ પાદેઽષ્ટકે તથા ।
છન્દોજ્ઞૈર્જ્ઞેયમેતત્તુ વૃત્તં ચિત્તવિલાસિતમ્ ॥ ૨૬॥

સ્મિતવશવિપ્રકાશૈર્દશનપદૈરમીભિઃ ।
વરતનુ પૂર્ણચન્દ્રં તવ મુખમાવૃણોતિ ॥ ૨૭॥

નવાક્ષરકૃતે પાદે ત્રીણિ સ્યુર્નૈધનાનિ ચ ।
ગુરૂણિ યસ્યાઃ સા નામ્ના જ્ઞેયા મધુકરી યથા ॥ ૨૮॥

ષડિહ યદિ લઘૂનિ સ્યુર્નિધનગતમકારશ્ચેત્ ।
બુધજનબૃહતીસંસ્થા ભવતિ મધુકરી નામ્ના ॥ ૨૯॥

કુસુમિતમભિપશ્યન્તી વિવિધતરુગણૈશ્છન્નમ્ ।
વનમતિશયગન્ધાઢ્યં ભ્રમતિ મધુકરી હૃષ્ટા ॥ ૩૦॥

દશાક્ષરકૃતે પાદે ત્રીણ્યાદૌ ત્રીણિ નૈધને ।
યસ્યા ગુરૂણિ સા જ્ઞેયા પઙ્ક્તિરુત્પલમાલિકા ॥ ૩૧॥

ત્રીણ્યાદૌ યદિ હિ ગુરૂણિ સ્યુશ્ચત્વારો યદિ લઘવો મધ્યે ।
પઙ્ક્તાવન્તગતમકારઃ સ્યાદ્વિજ્ઞેયા કુવલયમાલાખ્યા ॥ ૩૨॥

યથા - અસ્મિંસ્તે શિરસિ તદા કાન્તે વૈડૂર્યસ્ફટિકસુવર્ણાઢ્યે ।
શોભાં સ્વાં ન વહતિ તાં બદ્ધા સુશ્લિષ્ટા કુવલયમાલેયમ્ ॥ ૩૩॥

દ્વિતીયં ચ ચતુર્થં ચ ષષ્ટમષ્ટમમેવ ચ ।
હ્રસ્વં દશાક્ષરે પાદે યત્ર સા શિખિસારિણી ॥ ૩૪॥

જૌ ત્રિકૌ હિ પાદગૌ તુ યસ્ય ગૌ ચ સંશ્રિતૌ તથા સમૌ સ્તૌ ।
પઙ્ક્તિયોગસુપ્રતિષ્ઠિતાઙ્ગી સા મયૂરસારિણીતિ નામ્ના ॥

૩૫॥

યથા - નૈવ તેઽસ્તિ સંગમો મનુષ્યૈર્નાપિ કામભોગચિહ્નમન્યત્ ।
ગર્ભિણીવ દૃશ્યસે હ્યનાર્યે કિં મયૂરસારિણી ત્વમેવમ્ ॥

૩૬ ॥

આદ્યં ચતુર્થમન્ત્યં ચ સપ્તમં દશમં તથા ।
ગુરૂણિ ત્રૈષ્ટુભે પાદે યત્ર સ્યુર્દોધકં તુ તત્ ॥ ૩૭ ॥

ભૌ તુ ભગાવિતિ યસ્ય ગણાઃ સ્યુઃ સ્યાચ્ચ યતિસ્ત્રિચતુર્ભિરથાઽસ્મિન્ ।
ત્રૈષ્ટુભમેવ હિ તત્ખલુ નામ્ના દોધકવૃત્તમિતિ પ્રવદન્તિ ॥ ૩૮ ॥

યથા - પ્રસ્ખલિતાપ્રપદપ્રવિચાયં મત્તવિઘૂર્ણિતગાત્રવિલાસમ્ ।
પશ્ય વિલાસિનિ કુઞ્જરમેતં દોધકવૃત્તમયં પ્રકરોતિ ॥ ૩૯ ॥

આદૌ દ્વૌ પઞ્ચમં ચૈવાપ્યષ્ટમં નૈધનં તથા ।
ગુરુણ્યેકાદશે પાદે યત્ર તન્મોટકં યથા ॥ ૪૦ ॥

એષોઽમ્બુદતુલ્યનિસ્વનરવઃ ક્ષીવઃ સ્ખલમાનવિલમ્બગતિઃ ।
શ્રુત્વા ઘનગર્જિતમદ્રિતટે વૃક્ષાન્ પ્રતિમોટયતિ દ્વિરદઃ ॥ ૪૧ ॥

નવમં સપ્તમં ષષ્ઠં તૃતીયં ચ ભવેલ્લઘુ ।
સર્વાસ્વવસ્થાસુ ચ કામતન્ત્રે યોગ્યાસિ કિં વા બહુનેન્દ્રવજ્રા ॥ ૪૩ ॥

એભિરેવ તુ સંયુક્તા લઘુભિસ્ત્રૈષ્ટુભી યદા ।
ઉપેન્દ્રવજ્રા વિજ્ઞેયા લઘ્વાદાવિહ કેવલમ્ ॥ ૪૪ ॥

પ્રિયે શ્રિયા વર્ણવિશેષણેન સ્મિતેન કાન્ત્યા સુકુમારભાવૈઃ ।
અમી ગુણા રૂપગુણાનુરૂપા ભવન્તિ તે કિં ત્વમુપેન્દ્રવજ્રા ॥ ૪૫ ॥

આદ્યં તૃતીયમન્ત્યં ચ સપ્તમં નવમં તથા ।
ગુરૂણ્યેકાદશે પાદે યત્ર સા તુ રથોદ્ધતા ॥ ૪૬ ॥

કિં ત્વયા સુભટ દૂરવર્જિતં નાત્મનો ન સુહૃદાં પ્રિયં કૃતમ્ ।
યત્પલાયનપરાયણસ્ય તે યાતિ ધૂલિરધુના રથોદ્ધતા ॥

૪૭ ॥

યથા - કિં ત્વયા કુમતિસઙ્ગયા સદા નાજ્ઞયેવ સુહૃદાં પ્રિયં કૃતમ્ ।
યદ્ ગૃહાદ્વચનરોષકમ્પિતા યાતિ તૂર્ણમબલા રથોદ્ધતા ॥ ૪૮ ॥

આદ્યં તૃતીયમન્ત્યં ચ સપ્તમં દશમં ગુરુ ।
યસ્યાસ્તુ ત્રૈષ્ટુભે પાદે વિજ્ઞેયા સ્વાગતા હિ સા ॥ ૪૯ ॥

યથા - અદ્ય મે સફલમાયતનેત્રે જીવિતં મદનસંશ્રયભાવમ્ ।

આગતાસિ ભવનં મમ યસ્માત્સ્વાગતં તવ વરોરુ નિષીદ ॥

૫૦॥

ષષ્ઠં ચ નવમં ચૈવ લઘુની ત્રૈષ્ટુભે યદિ ।
ગુરૂણ્યન્યાનિ પાદે તુ સા જ્ઞેયા શાલિની યથા ॥ ૫૧॥

દુઃશીલં વા નિર્ગુણં વાપરં વા
લોકે ધૈર્યાદપ્રિયં ન બ્રવીષિ ।
તસ્માચ્છીલં સાધુહેતોઃ સુવૃત્તં
માધુર્યાત્સ્યાત્સર્વથા શાલિની ત્વમ્ ॥ ૫૨॥

તૃતીયં ચૈવ ષષ્ઠં ચ નવમં દ્વાદશં તથા ।
ગુરૂણિ જાગતે પાદે યત્ર તત્તોટકં ભવેત્ ॥ ૫૩॥

યદિ સોઽત્ર ભવેત્તુ સમુદ્રસમસ્ત્રિષુ ચાપિ તથા નિયમેન યતિઃ ।
સતતં જગતીવિહિતં હિ તતં ગદિતં ખલુ તોટકવૃત્તમિદમ્ ॥ ૫૪॥

યથા - કિમિદં કપટાશ્રયદુર્વિષહં બહુશાઠ્યમથોલ્બણરૂક્ષકથમ્ ।
સ્વજનપ્રિયસજ્જનભેદકરં નનુ તોટકવૃત્તમિદં કુરુષે ॥

૫૫॥

આદ્યં તૃતીયમન્ત્યં ચ પઞ્ચમં ષષ્ઠમેવ ચ ।
તથોપાન્ત્યં જગત્યાં ચ ગુરુ ચેત્કુમુદપ્રભા ॥ ૫૬॥

યૌ ત્રિકૌ તથા ન્યૌ યદિ ખલુ પાદે
ષડ્ભિરેવ વર્ણૈર્યદિ ચ યતિઃ સ્યાત્ ।
નિત્યસંનિવિષ્ટા જગતિવિધાને
નામતઃ પ્રસિદ્ધા કુમુદનિભા સા ॥ ૫૭॥

યથા - મન્મથેન વિદ્ધા સલલિતભાવા
નૃત્તગીતયોગા પ્રવિકસિતાક્ષી ।
નિન્દ્યમદ્ય કિં ત્વં વિગલિતશોભા
ચન્દ્રપાદયુક્તા કુમુદવતી ચ ॥ ૫૮॥

મતાન્તરે - યદિ ખલુ પાદે ન્યૌ ત્રિકૌ યથા યૌ
યતિરપિ વર્ણૈઃ ષડ્ભિરેવ ચેત્સ્યાત્ ।
જગતિવિધાને નિત્યસંનિવિષ્ટા

કુમુદનિભા સા નામતઃ પ્રસિદ્ધા ॥ ૫૯॥

યથા - કુમુદનિભા ત્વં કામબાણવિદ્ધા કિમસિ નતભ્રૂઃ શીતવાતદગ્ધા ।
મૃદુનલિનીવાપાણ્ડુવક્ત્રશોભા કથમપિ જાતા હ્યગ્રતઃ સખીનામ્ ॥ ૬૦॥

દ્વાદશાક્ષરકે પાદે સપ્તમં દશમં લઘુ ।
આદૌ પઞ્ચાક્ષરચ્છેદશ્ચન્દ્રલેખા તુ સા યથા ॥ ૬૧॥

વક્ત્રં સૌમ્યં તે પદ્મપત્રાયતાક્ષમ્
કામસ્યાવાસં સુનાસોચ્ચપ્રહાસમ્ ।
કામસ્યાપીદં કામમાહર્તુકામં
કાન્તે કાન્ત્યા ત્વં ચન્દ્રલેખેવ ભાસિ ॥ ૬૨॥

તૃતીયમન્ત્યં નવમં પઞ્ચમં ચ યદા ગુરુ ।
દ્વાદશાક્ષરકે પાદે યત્ર સા પ્રમિતાક્ષરા ॥ ૬૩॥

યથા - સ્મિતભાષિણી હ્યચપલાપરુષા નિભૃતાપવાદવિમુખી સતતમ્ ।
અપિ કસ્યચિદ્યુવતિરસ્તિ સુખા પ્રમિતાક્ષરા સ હિ પુમાઞ્જયતિ ॥ ૬૪॥

દ્વિતીયમન્ત્યં દશમં ચતુર્થં પઞ્ચમાષ્ટમે ।
ગુરૂણિ દ્વાદશે પાદે વંશસ્થા જગતી તુ સા ॥ ૬૫॥

યદિ ત્રિકૌ જ્તૌ ભવતસ્તુ પાદતસ્તથૈવ ચ જાવવસાનસંસ્થિતૌ ।
તદા હિ વૃત્તં જગતીપ્રતિષ્ઠિતં વદન્તિ વંશસ્થમિતીહ નામતઃ ॥ ૬૬॥

ન મે પ્રિયા ત્વં બહુમાનવર્જિતાં પ્રિયં પ્રિયા તે પરુષાભિભાષિણી ।
તથા ચ પશ્યામ્યહમદ્ય વિગ્રહં ધ્રુવં હિ વંશસ્થગતિં કરિષ્યતિ ॥ ૬૭॥

ચતુર્થમન્ત્યં દશમં સપ્તમં ચ યદા ગુરુ ।
ભવેદ્ધિ જાગતે પાદે તદા સ્યાદ્ધરિણપ્લુતા ॥ ૬૮॥

પરુષવાક્યકશાભિહિતા ત્વયા ભયવિલોકનપાર્શ્વનિરીક્ષણા ।
વરતનુઃ પ્રતતપ્લુતસર્પણૈરનુકરોતિ ગતૈર્હરિણપ્લુતમ્ ॥ ૬૯॥

સપ્તમં નવમં ચાન્ત્યમુપાન્ત્યં ચ યદા ગુરુ ।
દ્વાદશાક્ષરકે પાદે કામદત્તેતિ સા યથા ॥ ૭૦॥

કરજપદવિભૂષિતા યથા ત્વં સુદતિ દશનવિક્ષતાધરા ચ ।
ગતિરપિ ચરણાવલગ્નમન્દા ત્વમસિ મૃગનિભાક્ષિ કામદત્તા ॥ ૭૧॥

આદ્યં ચતુર્થં દશમં સપ્તમં ચ યદા લઘુ ।

પાદે તુ જાગતે યસ્યા અપ્રમેયા તુ સા યથા ॥ ૭૨॥

ન તે કાચિદન્યા સમા દૃશ્યતે સ્ત્રી
નૃલોકે વિશિષ્ટા ગુણૈરદ્વિતીયૈઃ ।
ત્રિલોક્યાં ગુણજ્ઞ્જ્ઞાન્ સમાહૃત્ય સર્વાન્
જગત્યપ્રમેયાસિ સૃષ્ટા વિધાત્રા ॥ ૭૩॥

દ્વિતીયં પઞ્ચમં ચૈવ હ્યષ્ટમેકાદશે યથા ।
પાદે યત્ર લઘૂનિ સ્યુઃ પદ્મિની નામ સા યથા ॥ ૭૪॥

રાસ્ત્રિકાઃ સાગરાખ્યા નિવિષ્ટા યદા
સ્યાત્ ત્રિકે ચ ત્રિકે યુક્તરૂપા યતિઃ ।
સન્નિવિષ્ટા જગત્યાસ્તતસ્સા બુધૈર્
નામતશ્ચાપિ સંકીર્ત્યતે પદ્મિની ॥ ૭૫॥

દેહતોયાશયા વક્ત્રપદ્મોજ્જ્વલા નેત્રભૃઙ્ગાકુલા દન્તહંસસ્મિતા ।
કેશપાશચ્છદા ચક્રવાકસ્તની પદ્મિનીવ પ્રિયે ભાસિ મે સર્વદા ॥ ૭૬॥

ફુલ્લપદ્માનના ત્વં દ્વિરેફેક્ષણા કેશપત્રચ્છદા ચક્રવાકસ્તની ।
પીતતોયાવલી બદ્ધકાઞ્ચીગુણા પદ્મિનીવ પ્રિયે ભાસિ નીરે સ્થિતા ॥ ૭૭॥

આદૌ ષટ્ દશમં ચૈવ પાદે યત્ર લઘૂન્યથ ।
શેષાણિ તુ ગુરૂણિ સ્યુર્જાગતે પુટસંજ્ઞિતા ॥ ૭૮॥

યદિ ચરણનિવિષ્ટૌ નૌ તથા મ્યૌ યતિવિધિરપિ યુક્ત્યાષ્ટાભિરિષ્ટઃ ।
ભવતિ ચ જગતીસ્થઃ સર્વદાસૌ ય ઇહ હિ પુટવૃત્તં નામતસ્તુ ॥ ૭૯॥

ઉપવનસલિલાનાં બાલપદ્મૈર્ભ્રમરપરભૃતાનાં કણ્ઠનાદૈઃ ।
મદનમદવિલાસૈઃ કામિનીનાં કથયતિ પુટવૃત્તં પુષ્પમાસઃ ॥ ૮૦॥

દ્વિતીયાન્ત્યે ચતુર્થં ચ નવમૈકાદશે ગુરુ ।
વિચ્છેદોઽતિજગત્યાં તુ ચતુર્ભિઃ સા પ્રભાવતી ॥ ૮૧॥

કથં ન્વિદં કમલવિશાલલોચને ગૃહં ધનૈઃ પિહિતકરે દિવાકરે ।
અચિન્તયન્ત્યભિનવવર્ષવિદ્યુતસ્ત્વમાગતા સુતનુ યથા પ્રભાવતી ॥ ૮૨॥

ત્રીણ્યાદાવષ્ટમં ચૈવ દશમં નૈધનદ્વયમ્ ।
ગુરૂણ્યતિજગત્યાં તુ ત્રિભિશ્છેદૈઃ પ્રહર્ષિણી ॥ ૮૩॥

ભાવસ્થૈર્મધુરકથૈઃ સુભાષિતૈસ્ત્વં

સાટોપસ્ખલિતવિલમ્બિતૈર્ગતૈશ્ચ ।
શોભાઢ્યૈર્હરસિ મનાંસિ કામુકાનાં
સુવ્યક્તં હ્યતિજગતી પ્રહર્ષિણી ચ ॥ ૮૪॥

ષષ્ઠં ચ સપ્તમં ચૈવ દશમૈકાદશે લઘુ ।
ત્રયોદશાક્ષરે પાદે જ્ઞેયં મત્તમયૂરકમ્ ॥ ૮૫॥

વિદ્યુન્નદ્ધાઃ સેન્દ્રધનુરઞ્જિતદેહા
વાતોદ્ધૂતાઃ શ્વેતવલાકાકૃતશોભાઃ ।
એતે મેઘા ગર્જિતનાદોજ્જ્વલચિહ્નાઃ
પ્રાવૃટ્કાલં મત્તમયૂરાઃ કથયન્તિ ॥ ૮૬॥

આદૌ  દ્વે ચતુર્થં ચૈવ ચાષ્ટમૈકાદશે ગુરુ ।
અન્ત્યોપાન્ત્યે ચ શક્વર્યા વસન્તતિલકા યથા ॥ ૮૭॥

ચિત્રૈર્વસન્તકુસુમૈઃ કૃતકેશહસ્તા ।
સ્રગ્દામમાલ્યરચના સુવિભૂષિતાઙ્ગી ।
નાનાવસન્તકવિભૂષિતકર્ણપાશા
સાક્ષાદ્વસન્તતિલકેવ વિભાતિ નારી ॥ ૮૮॥

પઞ્ચાદૌ શક્વરી પાદે ગુરૂણિ ત્રીણિ નૈધને ।
પઞ્ચાક્ષરાદૌ ચ યતિરસંબાધા તુ સા યથા ॥ ૮૯॥

યથા - માનાલોકજ્ઞઃ સુતબલકુલશીલાઢ્યો
યસ્મિન્સમ્માનં ન સદૃશમનુ પશ્યેદ્ધિ ।
ગચ્છેત્તં ત્યક્ત્વા દ્રુતગતિરપરં દેશમ્
કીર્ણા નાનાર્થૈરવનિરિયમસંબાધા ॥ ૯૦॥

ચત્વાર્યાદૌ ગુરૂણિ સ્યુર્દશમૈકાદશે તથા ।
અન્ત્યોપાન્ત્યે ચ શક્વર્યાઃ પાદે તુ શરભા યથા ॥ ૯૧॥

એષા કાન્તા વ્રજતિ લલિતા વેપમાના
ગુલ્મૈશ્છન્નં વનમભિનવૈઃ સમ્પ્રવિદ્ધમ્ ।
હા હા કષ્ટં કિમિદમિતિ નો વેદ્મિ મૂઢો
વ્યક્તં કાન્તે શરભલલિતાન્ત્વં કરોષિ ॥ ૯૨॥

અદૌ ષટ્ દશમં ચૈવ લઘુ ચૈવ ત્રયોદશમ્ ।
યત્રાતિશક્વરે પાદે જ્ઞેયા નાન્દીમુખી તુ સા ॥ ૯૩॥

યથા - ન ખલુ તવ કદાચિત્ક્રોધતામ્રાયતાક્ષં
ભ્રુકુટિવલિતભઙ્ગં દૃષ્ટપૂર્વં મયાસ્યમ્ ।
કિમિહ બહુભિરુક્તૈર્યા મમેચ્છા હૃદિસ્થા
ત્વમસિ મધુરવાક્યા દેવિ નાન્દીમુખીવ ॥ ૯૪॥

આદ્યં ચતુર્થં ષષ્ઠં ચ નૈધનં ચ યદા ગુરુ ।
ષોડશાક્ષરકે પાદે યત્રેભલલિતં તુ તત્ ॥ ૯૫॥

ભ્રૌ યદિ નાશ્ચ નિત્યમિહ વિરચિતચરણઃ
ગશ્ચ તથા વૈ ભવતિ નિધનમુપગતઃ ।
સ્યાદપિ ચાષ્ટિમેવ યદિ સતતમનુગતં
તત્ખલુ વૃત્તમગ્રવૃષભગજવિલસિતમ્ ॥ ૯૬॥

કાલતોયધરૈઃ સુધીરઘનપટુપટહરવૈઃ
સર્જકદમ્બનીપકુટજકુસુમસુરભિઃ ।
કન્દલસેન્દ્રગોપકરચિતમવનિતલં
વીક્ષ્ય કરોત્યસૌ વૃષભગજવિલસિતમ્ ॥ ૯૭॥

આદ્યાત્પરાણિ વૈ પઞ્ચ દ્વાદશં સત્રયોદશઃ ।
અન્ત્યોપાન્ત્યે ચ દીર્ઘાણિ લલિતપ્રવરં હિ તત્ ॥ ૯૮॥

યદા ય્મૌ પાદસ્થૌ ભવત ઇહ ચેત્સ્તૌ તથા ગૌ
તથા ષડ્ભિશ્ચાન્યૈર્યતિરપિ ચ વર્ણૈર્યથા સ્યાત્ ।
તદપ્યષ્ટૌ નિત્યં સમનુગતમેવોક્તમન્યૈઃ
પ્રયોગજ્ઞૈર્વૃત્તં પ્રવરલલિતં નામતસ્તુ ॥ ૯૯॥

યથા - નખાલીઢં ગાત્રં દશનખચિતં ચોષ્ઠગણ્ડં
શિરઃ પુષ્પોન્મિશ્રં પ્રવિલુલિતકેશાલકાન્તમ્ ।
ગતિઃ ખિન્ના ચેયં વદનમપિ સંભ્રાન્તનેત્રમ્
અહો શ્લાઘ્યં વૃત્તં પ્રવરલલિતં કામચેષ્ટમ્ ॥ ૧૦૦॥

આદ્યાત્પરાણિ પઞ્ચાથ દ્વાદશં સત્રયોદશમ્ ।
અન્ત્યં સપ્તદશે પાદે શિખરિણ્યાં ગુરૂણિ ચ ॥ ૧૦૧॥

ચતુર્ભિસ્તસ્યૈવ પ્રવરલલિતસ્ય ત્રિકગણૈઃ
યદા લૌ ગશ્ચાન્તે ભવતિ ચરણેઽત્યષ્ટિગદિતે ।
યદા ષડ્ભિશ્છેદો ભવતિ યદિ માર્ગેણ વિહિતઃ

તદા વૃત્તેષ્વેષા ખલુ શિખરિણી નામ ગદિતા ॥ ૧૦૨॥

યથા - મહાનદ્યા ભોગં પુલિનમિવ ભાતિ તે જઘનં
તથાસ્યં નેત્રાઢ્યં ભ્રમરસહિતં પઙ્કજમિવ ।
ગતિર્મન્દા ચેયં સુતનુ તવ ચેષ્ટા સુલલિતા
સ્તનાભ્યાં તાભ્યાં ત્વં શિખરિણિ સુપીનાસિ વનિતે ॥ ૧૦૩॥

યત્ર પઞ્ચ લઘૂન્યાદૌ ત્રયોદશચતુર્દશે ।
ષોડશૈકાદશે ચૈવ તત્સ્યાદ્વૃષભચેષ્ટિતમ્ ॥ ૧૦૪॥

યદિ હિ ચરણે ન્સૌ સ્લૌ ગઃ ક્રમાદ્વિનિવેશિતાઃ
યદિ ખલુ યતિઃ ષડ્ભિર્વર્ણૈસ્તથા દશભિઃ પુનઃ ।
યદિ વિહિતં સ્યાદત્યષ્ટિઃ પ્રયોગસુખાશ્રયં
વૃષભલલિતં વૃત્તં જ્ઞેયં તથા હરિણીતિ વા ॥

૧૦૫॥

યથા - જલધરરવં શ્રુત્વા શ્રુત્વા મદોચ્છ્રયદર્પિતો
વિલિખિતમહીશ ृઙ્ગાક્ષેપૈર્વૃષૈઃ પ્રતિનર્દ્ય ચ ।
સ્વયુવતિવૃતો ગોષ્ઠાદ્ગોષ્ઠં પ્રયાતિ ચ નિર્ભયો
વૃષભલલિતં ચિત્રં વૃત્તં કરોતિ ચ શાદ્વલે ॥ ૧૦૬॥

ચત્વાર્યાદૌ ચ દશમં ગુરુ યત્ર ત્રયોદશં
ચતુર્દશં તથાન્ત્યે દ્વે ચૈકાદશમથાપિ ચ ॥ ૧૦૭॥

યદા સપ્તદશે પાદે શેષાણિ ચ લઘૂન્યથ।
ભવન્તિ યસ્મિન્સા જ્ઞેયા શ્રીધરી નામતો યથા ॥ ૧૦૮॥

મો ભ્નૌ ચ સ્યુશ્ચરણરચિતાસ્તૌ ગુરૂ ચ પ્રવિષ્ટા
શ્છેદઃ શિષ્ટો યદિ ચ દશભિઃ સ્યાત્તથાન્યૈશ્ચતુર્ભિઃ ।
અત્યષ્ટૌ ચ પ્રતિનિયમિતા વર્ણતઃ સ્પષ્ટરૂપા
સા વિજ્ઞેયા દ્વિજમુનિગણૈઃ શ્રીધરી નામતસ્તુ ॥ ૧૦૯॥

સ્નાનૈશ્ચૂર્ણૈઃ સુખસુરભિભિર્ગન્ધવાસૈશ્ચ ધૂપૈઃ
પુષ્પૈશ્ચાન્યૈઃ શિરસિ રચિતૈર્વસ્ત્રયોગૈશ્ચ તૈસ્તૈઃ
।
નાનારત્નૈઃ કનકખચિતૈરઙ્ગસંભોગસંસ્થૈ
ર્વ્યક્તં કાન્તે કમલનિલયા શ્રીધરીવાતિભાસિ ॥ ૧૧૦॥

આદ્યં ચતુર્થં ષષ્ઠં ચ દશમં નૈધનં ગુરુ ।
તદ્વંશપત્રપતિતં દશભિઃ સપ્તભિર્યતિઃ ॥ ૧૧૧॥

યથા એષ ગજોઽદ્રિમસ્તકતટે કલભપરિવૃતઃ
ક્રીડતિ વૃક્ષગુલ્મગહને કુસુમભિરનતે ।
મેઘરવં નિશમ્ય મુદિતઃ પવનજવસમઃ
સુન્દરિ વંશપત્રપતિતં પુનરપિ કુરુતે ॥ ૧૧૨॥

દ્વિતીયમન્ત્યં ષષ્ઠં ચાપ્યષ્ટમં દ્વાદશં તથા ।
ચતુર્દશં પઞ્ચદશં પાદે સપ્તદશાક્ષરે ॥ ૧૧૩॥

ભવન્તિ યત્ર દીર્ઘાણિ શેષાણિ ચ લઘૂન્યથ ।
વિલમ્બિતગતિઃ સા તુ વિજ્ઞેયા નામતો યથા ॥ ૧૧૪॥

યદા દ્વિરુદિતૌ હિ પાદમભિસંશ્રિતૌ જસૌ ત્રિકૌ
તથૈવ ચ પુનસ્તયોર્નિધનમાશ્રિતૌ યૌ લગૌ ।
તદષ્ટિરતિપૂર્વિકા યતિરપિ સ્વભાવાદ્યથા
વિલમ્બિતગતિસ્તદા નિગદિતા દ્વિજૈર્નામતઃ ॥ ૧૧૫॥

યથા - વિઘૂર્ણિતવિલોચના પૃથુવિકીર્ણહારા પુનઃ
પ્રલમ્બરશના ચલત્સ્ખલિતપાદમન્દક્લમા ।
ન મે પ્રિયમિદં જનસ્ય બહુમાનરાગેણ ય
ન્મદેન વિવશા વિલમ્બિતગતિઃ કૃતા ત્વં પ્રિયે ॥ ૧૧૬॥

પઞ્ચાદૌ પઞ્ચદશકં દ્વાદશૈકાદશે ગુરુ ।
ચતુર્દશં તથાન્ત્યે દ્વે ચિત્રલેખા ધૃતૌ સ્મૃતા ॥ ૧૧૭॥

યથા નાનારત્નાઢ્યૈર્બહુભિરધિકં ભૂષણૈરઙ્ગસંસ્થૈ
ર્નાના ગન્ધાઢ્યૈર્મદનજનકૈરઙ્ગરાગૈર્વિચિત્રૈઃ ।
કેશૈઃ સ્નાનાઢ્યૈઃ કુસુમભરિતૈર્વસ્ત્રરાગૈશ્ચ તૈસ્તૈઃ
કાન્તે સંક્ષેપાત્ કિમિહ બહુના ચિત્રલેખેવ ભાસિ ॥

૧૧૮॥

અન્ત્યં સપ્તદશં ચૈવ ષોડશં સચતુર્દશમ્ ।
ત્રયોદશં દ્વાદશં ચ ષષ્ઠમષ્ટમમેવ ચ ॥ ૧૧૯॥

ત્રીણ્યાદૌ ચ ગુરૂણિ સ્યુર્યસ્મિંસ્ત્વેકોનવિંશકે ।
પાદે લઘૂનિ શેષાણિ શાર્દૂલક્રીડિતં તુ તત્ ॥ ૧૨૦॥

મ્સૌ જ્સૌ તૌ ગુરુ ચ પ્રયોગનિયતા યસ્મિન્નિવિષ્ટાસ્ત્રિકા
આદ્યા ચાન્ત્યયતિશ્ચતુસ્ત્રિકયુતા જ્ઞેયા પરા સપ્તભિઃ ।
નિત્યં યત્પદમાશ્રિતા હ્યતિધૃતિર્નિત્યં કવીનાં પ્રિયં
તજ્જ્ઞેયં ખલુ વૃત્તજાતિનિપુણૈઃ શાર્દૂલવિક્રીડિતમ્ ॥ ૧૨૧॥

યથા - નાનાશસ્ત્રશતઘ્નિતોમરહતાઃ પ્રભ્રષ્ટસર્વાયુધાઃ
નિર્ભિન્નોદરપાદબાહુવદના નિર્ણાશિતાઃ શત્રવઃ ।
ધૈર્યોત્સાહપરાક્રમપ્રભૃતિભિસ્તૈસ્તૈર્વિચિત્રૈર્ગુણૈઃ
વૃત્તં તે રિપુઘાતિ ભાતિ સમરે શાર્દૂલવિક્રીડિતમ્ ॥ ૧૨૨॥

તાવત્ત્વં વિજિતેન્દ્રિયઃ શુભમતે સર્વાત્મના પ્રત્યહં
દાને શીલવિધૌ ચ યોજય મનઃ સ્વર્ગાપવર્ગાપહમ્ ।
યાવદ્ વ્યાધિજરાપ્રચણ્ડનખરો વ્યાયત્સટાભિર્ભૃશં
મૃત્યુસ્તે ન કરોતિ જીવિતમૃગૈઃ શાર્દૂલવિક્રીડિતમ્ ॥ ૧૨૩॥

ચત્વાર્યાદૌ ચ ષષ્ઠં ચ સપ્તમં સચતુર્દશમ્ ।
તથા પઞ્ચદશં ચૈવ ષિડશં નૈધનં તથા ॥ ૧૨૪॥

એતાનિ ચ ગુરૂણિ સ્યુઃ શેષાણિ તુ લઘૂન્યથ ।
પાદે યત્ર કૃતૌ જ્ઞેયા નામ્ના સુવદના તુ સા ॥ ૧૨૫॥

મ્રૌ મ્નૌ ય્ભૌ લ્ગૌ ચ સમ્યગ્યદિ ચ વિરચિતાઃ પાદે ક્રમવશાત્
વિચ્છેદઃ સપ્તભિઃ સ્યાત્પુનરપિ ચ યતિઃ સપ્તાક્ષરકૃતા ।
યદ્યેષા સંશ્રિતા સ્યાત્કૃતિમપિ ચ પુનઃ શ્લિષ્ટાક્ષરપદા
વિદ્વદ્ભિર્વૃત્તજાતૌ તત ઇહ ગદિતા નામ્ના સુવદના ॥ ૧૨૬॥

યથા - નેત્રે લીલાલસાન્તે કમલદલનિભે ભ્રૂચાપવિનતે
રક્તોષ્ઠં પીનમધ્યં સમસહિતઘનાઃ સ્નિગ્ધાશ્ચ દશનાઃ ।
કર્ણાવંસપ્રલમ્બૌ ચિબુકમપિ નતં ઘોણા સુરુચિરા
વ્યક્તં ત્વં મર્ત્યલોકે વરતનુ વિહિતાસ્યેકા સુવદના ॥ ૧૨૭॥

ચત્વાર્યાદૌ તથા ષષ્ઠં સપ્તમં ચ ચતુર્દશમ્ ।
અષ્ટાદશં સપ્તદશં તથા પઞ્ચદશં પુનઃ ॥ ૧૨૮॥

અન્ત્યોપાન્ત્યે ગુરૂણ્યત્ર લઘૂન્યન્યાનિ સર્વદા ।
એકવિંશતિકે પાદે સ્રગ્ધરા નામ સા યથા ॥ ૧૨૯॥

મ્રૌ મ્નૌ યૌ યશ્ચ સમ્યગ્યદિ હિ વિરચિતાઃ સ્યુસ્ત્રિકાઃ પાદયોગે
વર્ણૈઃ પૂર્વોપદિષ્ટૈર્યતિરપિ ચ પુનઃ સપ્તભિઃ સપ્તભિઃ સ્યાત્ ।
વૃત્તં સમ્યગ્યદિ સ્યાત્પ્રકૃતિમનુગતં તત્ત્વવિદ્ભિઃ પ્રદિષ્ટં
વિજ્ઞેયં વૃત્તજાતૌ કવિજનદયિતા સ્રગ્ધરા નામતસ્તુ ॥ ૧૩૦॥

યથા - ચૂતાશોકારવિન્દૈઃ કુરવકતિલકૈઃ કર્ણિકારૈઃ શિરીષૈઃ
પુન્નાગૈઃ પારિજાતૈર્વકુલકુવલયૈઃ કિંશુકૈઃ સાતિમુક્તૈઃ ।
એતૈર્નાનાપ્રકારૈઃ બહુલસુરભિભિર્વિપ્રકીર્ણૈશ્ચ તૈસ્તૈઃ
વાસન્તૈઃ પુષ્પવૃન્દૈર્નરવર વસુધા સ્રગ્ધરેવાદ્ય ભાતિ ॥ ૧૩૧॥

ચતુર્થમાદ્યં ષષ્ઠં ચ દશમં દ્વાદશં તથા ।
ષોડશાષ્ટાદશે ચૈવ નૈધનં ચ ગુરૂણ્યથ ॥ ૧૩૨॥

દ્વાવિંશત્યક્ષરે પાદે શેષાણિ ચ લઘૂન્યથ ।
ભવન્તિ યત્ર તજ્જ્ઞેયં ભદ્રકં નામતો યથા ॥ ૧૩૩॥

ભ્રૌ ચરણે યદા વિનિયતૌ ત્રિકૌ ક્રમવશાદથાતિકૃતિવિધૌ
ન્રૌ ચ તતઃ પરં ચ રુચિરાવનન્તરકૃતૌ નગાવપિ પુનઃ ।
તચ્ચ દશાષ્ટવર્ણરચિતા ચતુર્ષ્વપિ તથા યતિશ્ચ સતતં
ભદ્રકવૃત્તમેવ ખલુ નાટ્યયોગકુશલૈર્બુધૈર્નિગદિતમ્ ॥ ૧૩૪॥

ઉત્પ્લુતમેકહસ્તચરણં દ્વિતીયકરરેચિતં
વંશમૃદઙ્ગવાદ્યમધુરં વિચિત્રકરણાનુગં બહુવિધમ્ ।
ભદ્રકમેતદદ્ય સુભગે વિદગ્ધગતિચેષ્ટિતૈઃ સુલલિતૈઃ
નૃત્યસિ વિભ્રમાકુલપદં વિવિક્તરસભાવિતં શશિમુખિ ॥ ૧૩૫॥

અન્ત્યમેકોનવિંશં ચ સપ્તમં સત્રયોદશમ્ ।
એકાદશં સપ્તદશં પઞ્ચમં ચ ગુરૂણ્યથ ॥ ૧૩૬॥

શેષાણિ ચ લઘૂનિ સ્યુર્વિકૃત્યાશ્ચરણે બુધૈઃ ।
વૃત્તં તદશ્વલલિતં વિજ્ઞેયં નામતો યથા ॥ ૧૩૭॥

યદિ ચ નકાર આદિરચિતઃ પદે વિરચિતોઽન્ત એવ લગૌ
યદિ ચ નભૌ ત્રિધા ચ નિહિતૌ ક્રમેણ ખલુ મધ્યાવપિ તથા ।
યદિ ચ સમાશ્રિતં હિ વિકૃતિં યતિશ્ચ દશભિસ્તથૈકસહિતૈઃ
તત ઇહ કીર્તિતં મુનિગણૈર્વિશુદ્ધચરિતૈસ્તદશ્વલલિતમ્ ॥ ૧૩૮॥

વિવિધતુરઙ્ગનાગરથયોધસઙ્કુલમલં બલં સમુદિતં

શરશતશક્તિકુન્તપરિઘાસિયષ્ટિવિતતં બહુપ્રહરણમ્ ।
રિપુશતમુક્તશસ્ત્રરવભીતશઙ્કિતભટં ભયાકુલદિશં
કૃતમભિવીક્ષ્ય સંયુગમુખે સમર્પિતગુણં ત્વયાશ્વલલિતમ્ ॥ ૧૩૯॥

ષડાદાવષ્ટમં ચૈવ હ્યેકાદશચતુર્દશે ।
વિંશં સપ્તદશં ચૈવ ત્રયોવિંશં તથૈવ ચ ॥ ૧૪૦॥

એતાનિ ચ લઘૂનિ સ્યુઃ શેષાણ્યથ ગુરૂણિ ચ ।
ચતુર્વિંશતિકે પાદે મેઘમાલેતિ સા યથા ॥ ૧૪૧॥

યદિ ખલુ ચરણસ્થિતૌ નૌ ત્રિકૌ
કૃતિકારવ્યાસ્તથા રાઃ સ્યુઃ ક્રમાત્ ।
ભવતિ યદિ યતિસ્તથા સપ્તભિઃ સપ્તભિ
સ્ત્રિષ્વતોઽન્યા યતિઃ પઞ્ચ વિધાત્તથા ॥ ૧૪૨॥

પવનબલસમાહૃતા તીવ્રગમ્ભીરનાદા બલાકાવલીમેખલા
ક્ષિતિધરસદૃશોચ્ચરૂપા મહાનીલધૂમાઞ્જનાભામ્બુગર્ભોદ્ભવા ।
સુરપતિધનુરુજ્જ્વલાબદ્ધકક્ષ્યા તડિદ્યોતસન્નાહપટ્ટીજ્વલા
ગગનતલવિસારિણી પ્રાવૃષણ્યા દૃઢં મેઘમાલાધિકં શોભતે ॥ ૧૪૩॥

આદ્યં ચૈવ ચતુર્થં ચ પઞ્ચમં ષષ્ઠમેવ ચ ।
નવમં દશમં ચૈવ નૈધનં ચ ભવેદ્ગુરુ ॥ ૧૪૪॥

લઘૂન્યન્યાનિ શેષાણિ પાદે સ્યુઃ પઞ્ચવિંશકે ।
વૃત્તજ્ઞૈઃ સા તુ વિજ્ઞેયા ક્રૌઞ્ચપાદીતિ નામતઃ ॥ ૧૪૫॥

ભ્મૌ યદિ પાદે સ્ભાવપિ ચેષ્ટાવભિકૃતિરપિ ચ હિ યદિ ખલુ વિહિતા
નાશ્ચ સમુદ્રાઃ સ્યુર્વિનિવિષ્ટા યદિ ચ ખલુ ગુરુ ભવતિ નિધનગતમ્ ।
પઞ્ચભિરાદૌ છેદમુપેતા પુનરપિ યતિરિહ યદિ ખલુ દશભિઃ
ક્રૌઞ્ચપદેયં વૃત્તવિધાને સુરગણપિતૃગણમુનિગણવિહિતા ॥ ૧૪૬॥

યઃ કિલ દાક્ષં વિદ્રુતસોમં ક્રતુવરમચમસમપગતકલશં
પાતિતયૂપં ક્ષિપ્તચષાલં વિચયનમસમિધમપશુકચરુકમ્ ।
કાર્મુકમુક્તેનાશુ ચકાર વ્યપગતસુરગણપિતૃગણમિષુણા
નિત્યમસૌ તે દૈત્યગણારિઃ પ્રદહતુ મખમિવ રિપુગણમખિલમ્ ॥ ૧૪૭॥

યા કપિલાક્ષી પિઙ્ગલકેશી કલિરુચિરનુદિનમનુનયકઠિના
દીર્ઘતરાભિઃ સ્થૂલસિરાભિઃ પરિવૃતવપુરતિશયકુટિલગતિઃ ।

આયતજઙ્ઘા નિમ્નકપોલા લઘુતરકુચયુગપરિગતહૃદયા
સા પરિહાર્યા ક્રૌઞ્ચપદા સ્ત્રી ધ્રુવમિહ નિરવધિસુખમભિલષતા ॥ ૧૪૮॥

અષ્ટાવાદૌ ગુરૂણિ સ્યુસ્તથા ચૈકોનવિંશકમ્ ।
એકવિંશં ચ વિજ્ઞેયં ચતુર્વિંશં સનૈધનમ્ ॥ ૧૪૯॥

એતાનિ ગુરુ સંખ્યાનિ શેષાણિ ચ લઘૂન્યથ ।
ષડ્વિંશત્યક્ષરે પાદે તદ્ભુજઙ્ગવિજૃમ્ભિતમ્ ॥ ૧૫૦॥

યસ્યાં મૌ તો નાઃ સ્ત્રૌ નિત્યં પ્રતિચરણમથ
ગદિતકાસ્ત્રિકા હ્યનુપૂર્વશઃ
ષડ્વિંશત્યામેકોનાયાં ચ યદિ હિ
ખલુ યતિરભિધા ચતુર્ભિરથાષ્ટાભિઃ ।
પશ્ચાદન્ત્યૌ લ્ગૌ સંયોજ્યૌ યદિ ભવતિ
મનુજદયિતાં સમાશ્રિતમુત્કૃતિં
નામ્ના વૃત્તં લોકે ખ્યાતં કવિવદન
વિકસનપરં ભુજઙ્ગવિજૃમ્ભિતમ્ ॥ ૧૫૧॥

યથા - રૂપોપેતાં દેવૈઃ સૃષ્ટાં સમદગજ
વિલસિતગતિં નિરીક્ષ્ય તિલોત્તમાં
પ્રાદક્ષિણ્યાત્પ્રાપ્તાં દ્રષ્ટું બહુવદન
મચલનયનં શિરઃ કૃતવાન્ હરિઃ ।
દીર્ઘં નિશ્વસ્યાન્તર્ગૂઢં સ્તનવદન
જઘનરુચિરાં નિરીક્ષ્ય તથા પુનઃ
પૃષ્ઠે ન્યસ્તં દેવેન્દ્રેણ પ્રવરમણિ
કનકવલયં ભુજઙ્ગવિજૃમ્ભિતમ્ ॥ ૧૫૨॥

દણ્ડકં નામ વિજ્ઞેયમુત્કૃતેરધિકતરમ્ ।
મેઘમાલાદિકં તત્સ્યાન્નૌ ચાદૌ કાગુહા ત્રિકાઃ ॥ ૧૫૩॥

યથા - મુદિતજનપદાકુલા સ્ફીતસસ્યાકરા ભૂતધાત્રી ભવન્તં સમભ્યર્ચતિ
દ્વિરદકરવિલુપ્તહિન્તાલતાલીવનાસ્ત્વાં નમસ્યન્તિ વિન્ધ્યાદયઃ પર્વતાઃ ।
સ્ફુટિતકલશાશુક્તિનિર્ગીર્ણમુક્તા ફલૈરૂર્મિહસ્તૈર્નમસ્યન્તિ વઃ સાગરાઃ
મુદિતજલચરાકુલાઃ સમ્પ્રકીર્ણમલાઃ કીર્તયન્તીવ કીર્તિં મહાનિમ્નગાઃ ॥ ૧૫૪॥

એતાનિ સમવૃત્તાનિ મયોક્તાનિ દ્વિજોત્તમાઃ ।
વિષમાર્ધસમાનાં તુ પુનર્વક્ષ્યામિ લક્ષણમ્ ॥ ૧૫૫॥

યત્ર પાદાસ્તુ વિષમા નાનાવૃત્તસમુદ્ભવાઃ ।
ગ્રથિતાઃ પાદયોગેન તદ્ વૃત્તં વિષમં સ્મૃતમ્ ॥ ૧૫૬॥

દ્વૌ સમં દ્વૌ ચ વિષમૌ વૃત્તેઽર્ધવિષમે તથા ।
સર્વપાદૈશ્ચ વિષમૈર્વૃત્તં વિષમમુચ્યતે ॥ ૧૫૭॥

હ્રસ્વાદ્યમથ દીર્ઘાદ્યં દીર્ઘં હ્રસ્વમથાપિ વા ।
યુગ્મોજવિષમૈઃ પાદૈઃ વૃત્તમર્ધસમં ભવેત્ ॥ ૧૫૮॥

પાદે સિદ્ધે સમં સિદ્ધં વિષમં સાર્વપાદિકમ્ ।
દ્વયોરર્ધસમં વિદ્યાદેષ છેદસ્તુ પાદતઃ ॥ ૧૫૯॥

છેદાસ્તુ યે મયા પ્રોક્તા સમવૃત્તવિકલ્પિતઃ ।
ત્રિકૈર્વિષમવૃત્તાનાં સમ્પ્રવક્ષ્યામિ લક્ષણમ્ ॥ ૧૬૦॥

નૈધનેઽન્યતરસ્યાં વૈ પ્રથમે પાદ ઇષ્યતે ।
દ્વિતીયે ચરણે ચ સ્યાદિત્યનુષ્ટુપ્ સમાસતઃ ॥ ૧૬૧॥

સૌ ગૌ તુ પ્રથમે પાદે સ્રૌ લ્ગૌ ચાપિ દ્વિતીયકે ।
યુગ્મેઽર્ધવિષમે પાદે જ્ઞેયા પથ્યા તુ સા ત્રિકૈઃ ॥ ૧૬૨॥

પ્રિયદૈવતમિત્રાસિ પ્રિયસંબન્ધિબાન્ધવા ।
પ્રિયદાનરતા પથ્યા દયિતે ત્વં પ્રિયાસિ મે ॥ ૧૬૩॥

મ્રૌ ગૌ તુ પ્રથમે પાદે ય્સૌ લ્ગૌ ચ દ્વિતીયકે ।
પાદે ભૌ લ્ગૌ તૃતીયે ચ ચતુર્થે તુ તસૌ લગૌ ॥ ૧૬૪॥

નૈવાચારો ન તે મિત્રં ન સંબન્ધિગુણપ્રિયા ।
સર્વથા સર્વવિષમા પથ્યા ન ભવસિ પ્રિયે ॥ ૧૬૫॥

અયુજોર્લક્ષણં હ્યેતદ્વિપરીતં તુ યત્ર ચ ।
પથ્યા હિ વિપરીતા સા વિજ્ઞેયા નામતો યથા ॥ ૧૬૬॥

કૃતેન રમણસ્ય કિં સખિ રોષેણ તેઽપ્યર્થમ્ ।
વિપરીતા ન પથ્યાસિ ત્વં જડે કેન મોહિતા ॥ ૧૬૭॥

ચતુર્થાદક્ષરાદ્યત્ર ત્રિલઘુ સ્યાદયુક્તતઃ ।
અનુષ્ટુપ્ચપલા સા તુ વિજ્ઞેયા નામતો યથા ॥ ૧૬૮॥

ન ખલ્વસ્યાઃ પ્રિયતમઃ શ્રોતવ્યં વ્યાહૃતં સખ્યા ।

નારદસ્ય પ્રતિકૃતિઃ કથ્યતે ચપલા હીયમ્ ॥ ૧૬૯॥

વિપુલા તુ યુજિ જ્ઞેયા લઘુત્વાત્સપ્તમસ્ય તુ ।
સર્વત્ર સપ્તમસ્યૈવ કેષાંચિદ્વિપુલા યથા ॥ ૧૭૦॥

સંક્ષિપ્તા વજ્રમધ્યે હિ હેમકુમ્ભનિભસ્તની ।
વિપુલાસિ પ્રિયે શ્રોણ્યાં પૂર્ણચન્દ્રનિભાનને ॥ ૧૭૧॥

ગઙ્ગેવ મેઘોપગમે આપ્લાવિતવસુન્ધરા ।
કૂલવૃક્ષાનારુજન્તી સ્રવન્તી વિપુલા બલાત્ ॥ ૧૭૨॥

આગતા મેઘસમયે ભીરુ ભીરુકુલોદ્ગતે ।
એકરાત્રૌ પરગૃહં ચોરી બન્ધનમર્હસિ ॥ ૧૭૩॥

એવં વિવિધયોગાસ્તુ પથ્યાપાદા ભવન્તિ હિ ।
યુગ્મોજવિષમૈઃ પાદૈઃ શેષૈરન્યૈસ્ત્રિકૈર્યથા ॥ ૧૭૪॥

ગુર્વન્તકઃ સર્વલઘુસ્ત્રિકો નિત્યં હિ નેષ્યતે ।
પ્રથમાદક્ષરાદ્યત્ર ચતુર્થાત્પ્રાગ્લઘુઃ સ્મૃતઃ ॥ ૧૭૫॥

પથ્યાપાદં સમાસ્થાપ્ય ત્રીણ્યન્તે તુ ગુરૂણ્યથ ।
ભવન્તિ પાદે સતતં બુધૈસ્તદ્વક્રમિષ્યતે ॥ ૧૭૬॥

દન્તક્ષતાધરં સુભ્રુ જાગરગ્લાનનેત્રં ચ ।
રતિસંભોગખિન્નં તે દર્શનીયતરં વક્ત્રમ્ ॥ ૧૭૭॥

ઇત્યેષા સર્વવિષમા નામતોઽનુષ્ટુબુચ્યતે ।
તદ્વિદાં મતવૈષમ્યં ત્રિકાદક્ષરતસ્તથા ॥ ૧૭૮॥

પાદે ષોડશમાત્રાસ્તુ ગાથાંશકવિકલ્પિતાઃ ।
ચતુર્ભિરંશકૈર્જ્ઞેયા વૃત્તજ્ઞૈર્વાનવાસિકા ॥ ૧૭૯॥

અસંસ્થિતપદા સુવિહ્વલાઙ્ગી મદસ્ખલિતચેષ્ટિતૈર્મનોજ્ઞા ।
ક્વ યાસ્યસિ વરોરુ સુરતકાલે વિષમા કિં વાનવાસિકા ત્વમ્ ॥ ૧૮૦॥

સ્જૌ સ્ગૌ ચ પ્રથમે પાદે તથા ચૈવ તૃતીયકે ।
કેતુમત્યાં ગણાઃ પ્રોક્તાઃ ભ્રૌ ન્ગૌ ગશ્ચ સદા બુધૈઃ ॥ ૧૮૧॥

સ્ફુરિતાધરં ચકિતનેત્રં રક્તકપોલમમ્બુજદલાક્ષમ્ ।
કિમિદં રુષાપહૃતશોભં કેતુમતીસમં વદ મુખં તે ॥ ૧૮૨॥

વક્ત્રસ્યાપરપૂર્વસ્ય ચાદૌ નૌ રો લગૌ ત્રિકાઃ ।
નજૌ રજૌ દ્વિતીયે ચ શેષાગ્રં પુનરેવ તુ ॥ ૧૮૩॥

પ્રથમે ચ તૃતીયે નૌ રલૌ ગશ્ચ પ્રકીર્તિતઃ ।
ગણાશ્ચાપરવક્ત્રે તુ નજૌ જૌ દ્વિચતુર્થયોઃ ॥ ૧૮૪॥

સુતનુ જલપરીતલોચનં જલદનિરુદ્ધમિવેન્દુમણ્ડલમ્ ।
કિમિદમપરવક્ત્રમેવ તે શશિવદનેઽદ્ય મુખં પરાઙ્મુખમ્ ॥ ૧૮૫॥

નૌ યૌ તુ પ્રથમે પાદે ન્જૌ જૌ ગશ્ચ તથાપરે ।
યત્ર તત્પુષ્પિતાગ્રા સ્યાદ્યદિ શેષં તુ પૂર્વવત્ ॥ ૧૮૬॥

પવનબલવિધૂતચારુશાખં
પ્રમુદિતકોકિલકણ્ઠનાદરમ્યમ્ ।
મધુકરપરિગીયમાનશબ્દં
વરતનુ પશ્ય વનં સુપુષ્પિતાગ્રમ્ ॥ ૧૮૭॥

સ્જૌ સ્લૌ ચાદૌ યથા ન્સૌ જગૌ ભ્નૌ જલૌ ગશ્ચ તથા પુનઃ ।
સ્જૌ સ્જૌ ગશ્ચ ત્રિકા હ્યેતે ઉદ્ગતાયાઃ પ્રકીર્તિતાઃ ॥ ૧૮૮॥

તવ રોમરાજિરતિભાતિ સુતનુ મદનસ્ય મઞ્જરી ।
નાભિકમલવિવરોત્પતિતા ભ્રમરાવલીવ કુસુમાત્સમુદ્ગતા ॥ ૧૮૯॥

સ્જૌ સ્લૌ ચ તતો ન્સૌ જગૌ નૌ સૌ ચેતિ તૃતીયકે ।
સ્જૌ સ્જૌ ગશ્ચ ચતુર્થે તુ લલિતાયા ગણાઃ સ્મૃતાઃ ॥ ૧૯૦॥

લલિતાકુલભ્રમિતચારુ વસનકરચારુપલ્લવા ।
પ્રવિકસિતકમલકાન્તિમુખી પ્રવિભાસિ દેવી સુરતશ્રમાતુરા ॥ ૧૯૧॥

એવમેતાનિ વૃત્તાનિ સમાનિ વિષમાણિ ચ ।
નાટકાદ્યેષુ કાવ્યેષુ પ્રયોક્તવ્યાનિ સૂરિભિઃ ॥ ૧૯૨॥

સન્ત્યન્યાન્યપિ વૃત્તાનિ યાન્યુક્તાનીહ પિણ્ડશઃ ।
ન ચ તાનિ પ્રયોજ્યાનિ ન શોભાં જનયન્તિ હિ ॥ ૧૯૩॥

યાન્યતઃ પ્રતિષિદ્ધાનિ ગીતકે તાનિ યોજયેત્ ।
ધ્રુવાયોગે તુ વક્ષ્યામિ તેષાં ચૈવ વિકલ્પનમ્ ॥ ૧૯૪॥

વૃત્તલક્ષણમેવં તુ સમાસેન મયોદિતમ્ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ હ્યાર્યાણામપિ લક્ષણમ્ ॥ ૧૯૫॥

પથ્યા ચ વિપુલા ચૈવ ચપલા મુખતોऽપરા ।
જઘને ચપલા ચૈવ આર્યાઃ પઞ્ચ પ્રકીર્તિતાઃ ॥ ૧૯૬॥

આસાં તુ સમ્પ્રવક્ષ્યામિ યતિમાત્રાવિકલ્પનમ્ ।
લક્ષણં નિયમં ચૈવ વિકલ્પગુણસંશ્રયમ્ ॥ ૧૯૭॥

યતિશ્છેદસ્તુ વિજ્ઞેયશ્ચતુર્માત્રો ગણઃ સ્મૃતઃ ।
દ્વિતીયાન્ત્યૌ યુજૌ પાદાવયુજૌ ત્વપરૌ સ્મૃતૌ ॥ ૧૯૮॥

ગુરુમધ્યવિહીનસ્તુ ચતુર્ગણસમન્વિતઃ ।
અયુગ્ગણો વિધાતવ્યો યુગ્ગણસ્તુ યથેપ્સિતઃ ॥ ૧૯૯॥

ષષ્ઠો વૈ દ્વિવિકલ્પસ્તુ નૈધનો હ્યેકસંસ્થિતઃ ।
પશ્ચાદર્ધે તુ ષષ્ઠઃ સ્યાદેકમાત્રસ્તુ કેવલઃ ॥ ૨૦૦॥

દ્વિવિકલ્પસ્તુ ષષ્ઠો યો ગુરુમધ્યો ભવેત્તુ સઃ ।
તથા સર્વલઘુશ્ચૈવ યતિસંજ્ઞાસમાશ્રિતા ॥ ૨૦૧॥

દ્વિતીયાદિલઘુર્જ્ઞેયઃ સપ્તમે પઞ્ચમે યતિઃ ।
પ્રથમાદિરથાન્ત્યે ચ પઞ્ચમે વા વિધીયતે ॥ ૨૦૨॥

ગણેષુ ત્રિષુ પાદસ્ય યસ્યાઃ પથ્યા તુ સા ભવેત્ ।
અતશ્ચ વિપુલાન્યા તુ વિજ્ઞેયા યતિલક્ષણા ॥ ૨૦૩॥

અયુજઃ સર્વગુરવો ગુરુમધ્યા ગણા યુજઃ ।
યસ્યાઃ સ્યુઃ પાદયોગે તુ વિજ્ઞેયા ચપલા હિ સા ॥ ૨૦૪॥

ત્રિંશદાદ્યે તુ વિજ્ઞેયાઃ સપ્તવિંશતિશ્ચાપરે ।
ઉભયોરર્ધયોર્જ્ઞેયો માત્રાપિણ્ડો વિભાગશઃ ॥ ૨૦૫॥

ત્રિંશત્તસ્યાશ્ચ યદિ સ્યુરેતાનિ દ્વિગુણાનિ તુ ।
ત્રીણ્યક્ષરાણિ ચાન્યાનિ ન્યસ્ય સંખ્યાવિભાગશઃ ॥ ૨૦૬॥

એતાનિ લઘુસંજ્ઞાનિ નિર્દિષ્ટાનિ સમાસતઃ ।
સર્વેષાં ચૈવમાર્યાણામક્ષરાણાં યથાક્રમમ્ ॥ ૨૦૭॥

અર્ધાષ્ટમગણાર્ધા ચ સવવાર્યા પ્રકીર્તિતા ।
ષષ્ઠશ્ચ દ્વિવિકલ્પસ્તુ નૈધને હ્યેકસંસ્થિતઃ ॥ ૨૦૮॥

પશ્ચાદ્વા યો ગણઃ ષષ્ઠ એકમાત્રઃ સ ઉચ્યતે ।
દ્વિવિકલ્પસ્તુ યઃ ષષ્ઠો ગુરુમધ્યો ભવેત્તુ સઃ ॥ ૨૦૯॥

યથા સર્વલઘુશ્ચૈવ યતિઃ સંખ્યાસમાશ્રિતા ।
સા દ્વિતીયા દ્વિલઘુકા સપ્તમે પ્રથમે યતિઃ ॥ ૨૧૦॥

ગુરુમધ્યવિહીનસ્તુ ચતુર્ગણસમન્વિતઃ ।
અયુગ્ગણો વિધાતવ્યઃ યુગ્ગણસ્તુ સ એવ ચ ॥ ૨૧૧॥

પ્રથમતૃતીયૌ પાદૌ દ્વાદશમાત્રૌ ભવેત્તુ સા પથ્યા ।
વિપુલાન્યા ખલુ ગદિતા પૂર્વોદિતલક્ષણોપેતા ॥ ૨૧૨॥

પથ્યા યથા -
રક્તમૃદુપદ્મનેત્રા સિતદીર્ઘબહુલમૃદુકેશી ।
કસ્ય તુ પૃથુમૃદુજઘના તનુબાહ્વ સોદરી પથ્યા ॥ ૨૧૩॥

વિપુલા યથા -
વિપુલજઘનવદનસ્તનનયનૈસ્તામ્રાધરોષ્ઠકરચરણૈઃ ।
આયતનાસાગણ્ડૈર્લલાટકર્ણૈઃ શુભા કન્યા ॥ ૨૧૪॥

દ્વિતીયશ્ચ ચતુર્થશ્ચ ગુરુમધ્યગતો ભવેત્ ।
ઉભયોરર્ધયોર્યત્ર વિજ્ઞેયા ચપલા યથા ॥ ૨૧૫॥

ઉદ્ભટગામિની પરુષભાષિણી કામચિહ્નકૃતવેષા ।
જાનાતિ માંસયુક્તા સુરાપ્રિયા સર્વતશ્ચપલા ॥ ૨૧૬॥

પૂર્વાર્ધે લક્ષણં હ્યેતદસ્યાઃ સ ચ મુખેન તુ ।
પશ્ચિમાર્ધે તુ ચપલા યસ્યાઃ સા જઘનેન તુ ॥ ૨૧૭॥

મુખચપલા યથા -
આર્યામુખે તુ ચપલા તથાપિ ચાર્યા ન મે યતઃ સા કિમ્ ।
દક્ષા ગૃહકૃત્યેષુ તથા દુઃખે ભવતિ દુઃખાર્તા ॥ ૨૧૮॥

જઘનચપલા યથા -
વરમૃગનયને ચપલાસિ વરોરુ શશાઙ્કદર્પણનિભાસ્યે ।
કામસ્ય સારભૂતે ન પૂર્વમદચારુજઘનેન ॥ ૨૧૯॥

ઉભયોરર્ધયોરેતલ્લક્ષણં દૃશ્યતે યદિ ।
વૃત્તજ્ઞૈઃ સા તુ વિજ્ઞેયા સર્વતશ્ચપલા સખિ ॥ ૨૨૦॥

કાર્યૌ દ્વાદશમાત્રૌ ચ પાદાવાદ્યૌ તૃતીયકૌ ।

અષ્ટાદશ દ્વિતીયં ચ તથા પઞ્ચદશોત્તમા ॥ ૨૨૧॥

ચતુઃપઞ્ચપ્રકારાણાં ચતુષ્કાણાં વિશેષતઃ ।
પ્રસ્તારયોગમાસાદ્ય બાહુલ્યં સમ્પ્રદર્શયેત્ ॥ ૨૨૨॥

પઞ્ચપઞ્ચાશદાદ્યા તુ ત્રિંશદાદ્યા તથૈવ ચ ।
આર્યા ત્વક્ષરપિણ્ડેન વિજ્ઞેયાત્ર પ્રયોક્તૃભિઃ ॥ ૨૨૩॥

ત્રિંશતસ્ત્વથ વર્ણેભ્યો લઘુવર્ણત્રયં ભવેત્ ।
શેષાણિ ગુરુસંખ્યાનિ હ્યેવં સર્વત્ર નિર્દિશેત્ ॥ ૨૨૪॥

સર્વેષામેવ ચાર્યાણામક્ષરાણાં યથાક્રમમ્ ।
સર્વેષાં જાતિવૃત્તાનાં પૂર્વમુત્તરસંખ્યયા ॥ ૨૨૫॥

વિકલ્પગણનાં કૃત્વા સંખ્યાપિણ્ડેન નિર્દિશેત્ ।
આર્યાગીતિરથાર્યૈવ કેવલં ત્વષ્ટભિર્ગણૈઃ ॥ ૨૨૬॥

ઇતરાર્થે જઃ ષષ્ઠસ્તુ નલઘુગણ ઇષ્યતે ।
વૃત્તૈરેવં તુ વિવિધૈર્નાનાછન્દસ્સમુદ્ભવૈઃ ।
કાવ્યબન્ધાસ્તુ કર્તવ્યાઃ ષટ્ત્રિંશલ્લક્ષણાન્વિતાઃ ॥ ૨૨૭॥

ઇતિ ભરતીયે નાટ્યશાસ્ત્રે છન્દોવિચિતિર્નામ પઞ્ચદશોઽધ્યાયઃ ।

Encoded by Sowmya Krishnapur krsowmya@yahoo at com

---

*Natya Shastra Chapter 15*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*